# निपातार्थविचारः

डॉः गिरिजा.टी.वी.

शब्दानुशासनम् अथवा शब्दशास्त्रं भवति व्याकरणम्। व्याकरणशास्त्रे पदानां प्रयोगः सुविचारितपरम्परया भवति। अर्थबोधकः अक्षरसमुदायः पदम्। वेदे चतुर्विधपदस्य सङ्केतः समुपलभ्यते। ऋग्वेदे हि-

"चत्वारि शृङ्गा त्रयो अस्य पादा, द्वे शीर्ष सप्त हस्तासो अस्य।

त्रिधा बद्धो वृषभो रोरवीति, महोदेवो मर्त्याम् आविवेश"।[१]

अत्र चत्वारि शृङ्गा इत्यनेन पदस्य चतुर्विधत्वं गृहीतम्। चत्वारि शृङ्गाणि पदजातानि नामारख्यातोपसर्ग निपाताश्च। निरुक्तकारेण यास्केन चत्वारि शृङ्गा इति नामाख्यातोपसर्गनिपाताश्चेति प्रस्तूयते। पाणिनिना अष्टाध्याय्यां सुबन्तरूपेण तिङ्न्तरुपेण च पदविभागः कृतः। सुबन्तेष्वन्त भूतानाम् अव्ययानां निपात, उपसर्ग, गति, कर्मप्रवचनीयञ्चेति विभागः अष्टाध्याय्यां दृश्यते। 'प्रादयः', 'उपसर्गाः क्रियायोग' इति सूत्रद्वयं उपसर्गनिबद्धम्। उपपूर्वक सृज् विसर्गे घञि कृते रूपं भवति उपसर्गः। उपगृह्य आख्यातं तस्यैवार्थविशेषं सृजन्तीति उपसर्गः प्रादयः द्वाविंशति।

'प्राग्रीश्वरान्निपाताः' इति सूत्रं निपातसंज्ञां विधत्ते। अष्टाध्याय्यां प्रथमाध्याये चतुर्थपादे भवति अस्य सूत्रस्य स्थानम्।

स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वया क्षमः।

सुबाद्यन्यो निपातेऽसौ विविधश्चादि भेदतः।।[२]

इति शब्दशक्तिप्रकाशिकायां निपातस्य लक्षणम्। यः शब्दः केवले यादृश स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रति असमर्थः सुबादि प्रत्ययेभ्यः प्रत्येकं भिन्नः सः तादृशार्थे निपातः। चादयो निपाताः स्वार्थे समुच्चयादौ नामाद्यर्थस्य अभेदान्वयं प्रति अयोग्याः। नहि स्मृतमनुभूतं चेत्यादितः कस्यापि स्मृताभिन्नः समुच्चयः इत्यादिरनुभवतः किन्तु स्मृतानुभूतयोः समुच्चयः, स्मृतमनुभूतं समुच्चितं इत्यादिरेव इति चादिषु

निपातलक्षण समन्वयः।

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।

सत्वाभिधायकं नाम निपातः पादपूरणः। [३] (नि. का. १-१-१)

प्रातिशाख्यानन्तरं यास्कनिरुक्ते चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च तानीमानि भवन्तीति समुपलभ्यते। वेदे प्रातिशाख्ये निरुक्ते च शाब्दिकानां पद चातुर्विध्यं प्रसिद्धमस्ति। किन्तु व्यवहारे स्वतन्त्ररूपेण द्विविधस्यैव पदस्य प्रयोगात् द्विविधं पदमिति प्रसिद्धिः। महर्षिणा पाणिनिना 'सुप्तिङन्तं पद'मिति प्राह। परन्तु शब्दशास्त्रे सुप्पदेन नामोपसर्गनिपातानाम् तिङ्पदेनाख्यातस्य च बोधो भवति। तस्मात् पाणिनीयशास्त्रे द्विविधमेव पदमिति सम्भाव्य भर्तृहरिणा उक्तं वाक्यपदीये-

द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधापि वा।

अपोद्धृत्यैव वाक्येभ्यः प्रकृति प्रत्ययादिवत्।

अनया कारिकया यथा पदे प्रकृतिप्रत्ययादि कल्पना भवति, तथैव वाक्येऽपि पदानां कल्पना जायते। तत्र कल्प्यमान पदभेदे केचिदाचार्याः नामाख्यातरुपं द्विविधं पदमाहुः। अपरे पुनः नामाख्यातोपसर्गनिपाताश्चेति पदस्य चतुर्विधत्वं साधयन्ति। एवं नामाख्यातरूप पदद्वयविभागे एव विशेषणी भूतानामुपसर्गनिपातादीनामप्यन्तर्भावः सम्पद्यते। ये तु हिरुगादयः क्रियाप्रधानाः निपातास्तेषामाख्यातेऽन्तर्भावो बोध्यः।

उपसर्गनिपातयोः परस्पंर भेदश्च सामान्यविशेषपरतया बोध्यः। सामान्यं हि निपातः विशेषश्चोपसर्ग इति। यथा हेलाराजः- सिद्ध्यसाध्यार्थ विषयकविशेषद्योतकत्व न्निपातानाम्। साध्यैकनियतत्वाच्चोपसर्गाणां परस्पर भेदः अर्थान्निपाताः नामाख्यातार्थय ोरुभयोरेव द्योतकाः भवन्ति। निपातपदसंख्याविषये बृहद्देवतायामेवमुच्यते-

"इयन्त इति संख्यानां निपातानां न विद्यते।

वशात् प्रकरणस्यैते निपात्यन्ते पदे पदे" इति।

पाणिनिना प्रायो निपातः आकृतिगणे परिगणित एव। उपसर्गसंख्यापि पाणिनीये नियतैव। प्रातिशाख्ये 'उपसर्गो विशेषकृत्' इत्येवं सामान्यवचनमेवोपसर्गविषये लब्धम्। निपातसंज्ञकपदानि चादिगणे परिगणितानि। निपातार्थविषये शास्त्रेषु पक्षत्रयं दृश्यते नि पातार्थनामनुभवादीनां धातुमात्रतो बोधाभावेन उपसर्गसम्बन्धात् तद्बोध इत्युपसर्गाणां

विशेषार्थ द्योतकत्वं स्पष्टमेव। यथा 'ईश्वरमनुभवती'त्यत्र अनुभवरूपार्थस्य 'अनु' शब्दः द्योतकः। किन्तु ईश्वरमनुभवति इत्यत्र प्रतीयमान अनुभवो धातोः नास्ति। धात्वर्थे भू धातोः सत्तार्थकत्वात्। तदुक्तं भर्तृहरिणा-

"क्वचित् सम्भाविनो भेदा केवलैरभिदर्शिताः।

उपसर्गेण सम्बन्धे व्यज्यन्ते प्रपरादिना।। ५" इति प्रथम पक्षः।

उपसर्गाणां वाचकत्वमपि स्वीक्रियते क्वचित्। यथा प्रतिष्ठते इत्यादौ धातोः गतिनिवृत्तिवाचकत्वम् प्रशब्दस्य गतिवाचकत्वम्। तदुक्तं हरिणा-

"स वाचको विशेषाणां सम्भवात्" इति द्वितीयः पक्षः। सम्भूय धातूपसर्गावर्थमाहतुः

उपसर्गस्तु शक्तिमात्रं कुरुत इत्यर्थाभिधाने सहकारिणः उपसर्गाः।

उक्तं च वाक्यपदीये-

"शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते" इति तृतीयः पक्षः। उक्तेषु पक्षेषु कतमः श्रेष्ठः इति विचारणायामुपसर्गाणां द्योतकत्वमेव समुचितमिति प्रतीयते। यथा प्रतिष्ठते इत्यत्र धातूनांम् अनेकार्थकत्वात् 'स्था' धातोरेव गतिरर्थ। प्रशब्दस्तु तस्यार्थस्य द्योतकः एवम्-

"निपाताः द्योतकाः केचित् पृथगर्थाभिधायिनः।

आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः"।।

अस्यामपि द्योतकत्वपक्ष एव न्याय्यः। केवलानां चादिनिपातानां प्रयोगदर्शनाभावात्। अत्र निपाताः द्योतकाः इति प्रथम पक्षः। निपाताः पृथगर्थाभिधायिनः वाचकाः इति द्वितीय पक्षः। सम्भूय धातुनिपातावर्थमाहतुः, निपातास्तु शक्तिमात्रं कुरुते इति सहकारिणो निपाता इति तृतीयः पक्षः। निपातानां वाचकत्वस्वीकारे गवादिवत् केवलानामपि चादीनां प्रयोगापत्तिः। अतः अनुमीयते यत् चादयो न वाचकाः केवलानामप्रयोगात् प्रत्ययवत्।

**विविधाचार्याणाँ मते उपसर्गनिपातानां संक्षिप्तपरिचयः**

श्रीमत्कुमारिलभट्टस्य मीमासाश्लोकवार्तिके उपसर्ग निपातयोः प्रतिपादनमुपलभ्यते।

यथा-

वाचकद्योतकत्वन्तु नातीवात्रोपयुज्यते

तद्भावात् वाचकत्वं वा परस्यानुग्रहोऽस्तु वा।।

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।

क्रियते संशयोत्पत्तेर्नोपसर्ग निपातयो।। इति।

श्रीमन्तो गदाधर भट्टाचार्याः स्वग्रन्थे व्युत्पत्तिवादे प्रादयो- द्योतका एव न तु प्रकर्षादिवाचकाः इति सर्वानुमतः पन्थाः परिष्कर्तुं शक्यते इति व्याख्यानात् निंसन्दिग्धरूपेण उपसर्गाणां द्योतकत्वं प्रस्तुवान्ति। तत्स्वीकारे बीजन्तु प्रतिबन्धकत्व लाघवं प्रतिपादयन्ति। अथ च निपातातिरिक्त प्रातिपदिकार्थयोः क्रिया तादृश प्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयबोधस्य अव्युत्पन्नत्वात् इति संकोचात् निपातानां वाचकत्वं व्यञ्जयन्ति।

"शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्"

प्रकृति प्रत्ययश्चैव निपातश्चेति सत्रिधा ।। इति

शब्दशक्तिप्रकाशिकाकाराः श्रीजगदीशतर्कालङ्काराः कारिकाव्याख्यानाभ्यां निपातानां सार्थकत्वात् वाचकत्वमङ्गीकुर्वन्ति। न्यायकोशकारः महामहोपाध्याय भीमाचार्योपि उपसर्गणां द्योतकत्वं निपातानां वाचकत्वमुच्यते। तत्वचिन्तामणौ नव्यन्यायप्रवर्तकैः गङ्गेशोपाध्यायैः 'उपसर्गास्तु द्योतका : न वाचकाः' इत्युक्तम्। द्योतकत्वञ्च धातोरर्थविशेषे तात्पर्यग्राहकत्वम्। तत्र शक्तिः वा इति प्रतिपाद्यते। निरुक्तकारेण यास्काचार्येण विंशतिरेवोपसर्गाः (निस, दुस विहाय) सम्मन्यन्ते। एवं उच्चावचेषु अर्थेषु निपतन्ति इत्येतं व्यूत्पादितत्वात् निपातानामपि वाचकत्वमेव अङ्गीक्रियते। नैरुक्ताः उपसर्गाणां निपातानां च वाचकत्वमेवाऽमनन्ति। धातूनामनेकार्थत्वात् उपसर्गाणां द्योतकत्वमस्तीति वैयाकरणानां मतम्। 'उपसर्गाः क्रियायोगे' इत्यत्र 'क्रियायोग' इत्यस्य क्रियाविशेषद्योतकत्वमित्यर्थः। उपसर्गे प्रयुक्ते सति योऽर्थः प्रकाशते स उपसर्गस्य न भूत्वा तेषामेव नाम्नामाख्यातनाम्ना वा भवति। उपसर्गस्तु तेषामर्थानां द्योतनं कुर्वन्ति इति शाकटायनमतम्। वाक्यपदीयकारेण भर्तृहरिणा पदकाण्डे-

"चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः।

प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते"

इति लिखितम्। अनया कारिकया चादयो वाचका न भवन्ति। पदत्वे सति केवलानाम् प्रयुज्यमानत्वात् व्यतिरेके गवादि पदवदित्यनुमानात् निपातानां द्योतकत्वं निष्कृष्यते। कैयटोऽपि अत्र द्योतकत्वपक्षमङ्गीकृत्य 'अथ शब्दानुशासनम्' इति प्रदीपव्याख्यावसरे 'अधिकारः प्रस्तावः द्योत्यत्वेनास्य प्रयोजन'मित्यर्थमाहस्म। निपातानाञ्च द्योतकत्वं वाक्यपदीये निर्णीतम्। भूषणकारः कौण्डभट्टः

"निपातानां वाचकत्वमन्वयव्यतिरेकयोः

युक्तं वा न तु तदयुक्तं परेषां मतमेव न।"

इति कारिकया निपातानां द्योतकत्वं वाचकत्वं चेत्येव निष्कर्षरुपेण स्वीकुर्वन्ति, न तु द्योतकत्वमेव अथवा वाचकत्वमेव। निपातानां वाचकत्वं साक्षात्क्रियते, अलंक्रियते गुरुः इत्यादौ साक्षात्कारालङ्कारया निपातार्थतया धात्वर्थत्वाभावत् द्यात्वर्थ कर्मत्वेन गुर्वादेः लकारेणाभिधानात् अनुपात्तिः कर्मणि लकारसं भवादिति चेत् न। तत्र साक्षात्पदादेः प्र त्यक्षादिरूपफलवाचकत्वोपगमेन धातोश्च तदनुकूलव्यापार वाचकत्वोपगमेनादोषात्। शिष्यादिनिष्ठव्यापारजन्यप्रत्यक्षाविषयो गुरुः इति शाब्दबोधसंभवात्। विषयता सम्बन्धेन प्रत्यक्षरूप फलाश्रयत्वात् गुरोः कर्मत्वोपपत्तेः। न चैवमपि गुर्वादेः कर्मत्वानुपपत्तिरेव, धात्वर्थतावच्छेदकफलशालित्वा भावादिति वाच्यम्। धातुशक्यतावच्छेदकत्वरु- पस्य धात्वर्थतावच्छेदकत्वरुपस्य धात्वर्थताव च्छेदकत्वस्य फले अभावेऽपि धात्वर्थव्यापारे अनुकूलता सम्बन्धेनान्वयित्वपस्य धात्वर्थतावच्छेदकत्वस्य साक्षात्पदार्थे प्रत्य क्षुरुपफले सत्वात्.।

भूषणानुसारेण प्रादयो द्योतकाः चादयोवाचका इति नैयायिकमतमयुक्तम्। वैषम्ये बीजाभावादिति ध्वनयता निपातानां द्योतकत्वं समर्थ्येते।

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा

उपास्येते हरिहरौ लकारो दृश्यते यथा।।

येन हेतुना प्रादयो द्योतकाः तेनैव हेतुना चादयो निपाताः तथा द्योतकाः। अयं भावः - ईश्वरमनुभवती त्यादौ अनुभवादि रूपोऽर्थः प्रतीयते। स च न द्यात्वर्थः। भवतीत्यत्रापि अनुभवादि प्रतीत्यापत्तेः। नोपसर्गार्थः तथा सति तस्य आख्यातप्रकृत्यर्थत्वाभावेन

तत्राख्यातार्थ कालादेः अनन्वयापत्तेः। अनुगच्छतीत्यादावपि अनुभवार्थप्रतीत्यापत्तेश्च। नापि उपसर्गविशिष्ट धात्वर्थः। अतः भूधातोरेव विद्यमानत्वार्थकस्य अनुभवे लक्षणा। उपसर्गस्तात्पर्यग्राहकः। तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वामिति।

न च निपातानां वाचकत्वे 'चार्थे द्वन्द्वः' इत्यादि सूत्रमेव प्रमाणम्, प्रादीनां वाचकत्वे तु प्रमाणानुपलम्भात् द्योतकतैवोचितामिति वाच्यम्। निपातानां द्योतकत्वमते 'अब्राह्मण' इत्यादौ तत्पुरुष लक्षणस्याव्याप्तिः। उत्तरपदार्थप्रधानो हि तत्पुरुषः। पूर्वपदस्य नञः अर्थवाचकत्वाभावेन उत्तरपदार्थस्य प्राधान्याभावात्, प्राधान्यस्य पदार्थान्तरनिरूपितत्वात्। लघुमञ्जूषायां निपातानां द्योतकत्वं अनभूयते सुखं साक्षात्क्रियते गुरुः इत्यादो अनु, साक्षात् इत्यादिनिपाताः द्योतकाः। अनुभव साक्षात्कारः इत्यादि फलानां धात्वर्थत्वम्। एवं च व्यापारव्यधिकरण फलवाचकत्वरुपं सकर्मकत्वं धातोर्निवहति। कर्मसंज्ञकार्थान्वयार्थकत्वं सकर्मकत्वमिति स्वीकारेपि फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफले एवान्वयौचित्येन धात्वर्थफलद्योतकत्वमेव निपातानामावश्यकम्। द्योतकत्वं समाभिव्याहृत शब्दनिष्ठवृत्युद्बोधकत्वम्।

उद्योते नागेशभट्टेनोक्तम्- निपातानां द्योतकतावादि मते अब्राह्मणा इत्यादौ तत्पुरुषलक्षणा व्युत्पात्तिः पूर्वपद स्यानर्थकत्वेनोत्तरपदार्थ प्राधान्याभावात् उपसगस्यार्थवत्वाभावेन प्रातिपादिकत्वाभावाद्विभक्तिश्च ततो न स्यादिति चेन्न, नञ् समासादौचोत्तरपादार्थ प्रधानता, सा द्योत्यार्थमादायैव।

उसंहारः

उपसर्गाः वाचकाः द्योतकाः वेति चर्चा शाकटायन कालादारभ्य प्रचरन्ति। न निर्बद्धा उपसर्ग अर्थन्निराहुरिति शाकटायनो नामारव्यातयोस्तु कर्मोपसंयोगाद्योतकाः भवान्ति इति शाकटायन मतम्। उच्चावचाः पदार्थाः भवन्तीति गार्ग्यस्तदा। एषु पदार्थाः प्राहुरिमे तन्नामाख्यातयोरर्थविकरम् इति वाचक वादिनः गार्ग्यस्य मतं च निकक्ते पक्षद्वयं सङ्गृहीत्व। द्योतकत्वं नाम तात्पर्यग्रहकमिति भूषणकृतः। धातोः विवाक्षितऽर्थे तात्पर्यग्राहकत्वमेव असर्गेणां द्योतकत्वं सिध्यति। नामाख्यातयोः निपातस्य च वाक्ये पदत्वेन प्रयोगः क्रियते। उपसर्गस्य तु धातुसम्बन्धेनेव प्रयोगदर्शनात् तस्य स्वकीयः अर्थो न विद्यते। धातो अर्थविशेषं उपसर्गाः द्योतयन्ति, अतः तेषां द्योतकत्वमिति केचित्। अनेकार्थेषु धातुषु एकस्य कस्यचिदर्थस्य तात्पर्यग्रहकत्वमेव उपसर्गः क्रियते।

महाभाष्यकारेण उपसर्गाणां वाचकत्वपक्षः अङ्गीक्रियते। आचार्यो गार्ग्यः, यास्काचार्यः, निरुक्तव्याख्याकाराः स्कन्दमहेश्वरदुर्गश्चापि उपसर्गाणां वाचकत्वपक्षमङ् गीकुर्वन्ति। प्रायेण सर्वेषु प्रातिशाख्यग्रन्थेष्वपि वाचकतापक्षस्यैत प्रतिष्ठा वर्तते। कैयट नागेश भर्तृहरिअष्टाध्यायी व्याख्यातार

ः जयादित्यवामनजिनेन्द्रबुद्धिहदरदत्तादयः कौमुदी व्याख्याता ज्ञानेन्द्रसरस्वती, कौटिल्यः भरतः शौनकः दुर्गाचार्यः सायणद्याचार्याः उपसर्गाणां द्योतकत्ववादिनः सन्तः संस्कृत भाषाविचार सदसि विराजन्ते। कौण्डभट्ट प्रभृतयः प्राचिनाः वैयाकरणाः निपातानां वाचकत्वपक्षमपि स्वीकुर्वन्ति। तेषां मते निपातानां तदर्थवाचकत्त्वमपि युक्तम्, बोधकत ारुपशाक्तेरबाधात्।

तदुक्तं - निपातानां वाचकत्वमन्वयव्यातिरेकयोः।

युक्तं वा न तु तद्युक्तं परेषामतमेव न।।

एवं भर्तृहरिमते निपातानां द्योतकत्वम्, पतञ्जलि मते निपातानां द्योतकत्वं वाचकत्वञ्च, कैयटमते निपातानां द्योतकत्वं नागेशमते च निपातानां द्योतकत्वमेवेति सिध्यति। भाट्टपादस्य मतेऽपि उपसर्गनिपातयोः द्योतकत्वं समर्थितम्।

**References :**

1. Karika1,Rigveda,
2. Sabdasakthi prakasika page 54,
3. Niruktakarika1-1-1,
4. Vakyapadeeya canto1 ,
6. Vakyapadeeya canto1,
7. Vakyapadeeya canto 2,
8. Meemamsa sloka varthika page15,
9. Sabdasakthiprakasika page 194,
10. Vakyapadeeya canto 2,
11. Bhushanasara,
12. Bhushanasara Nipatartha vichara

## सहायकग्रन्थसूची


१. उपसर्गनिपातमीमांसा : डा. गेयकुमारझा (गङ्गेश) राष्ट्रियसंस्कृत साहित्यकेन्द्र जयपुर, २००३

२. उपसर्गार्थविवेचनम् : डा. अभयानाथझा नाग पाब्लिशर्स जवाहरनागर, दिल्ली ११०००७

३. वैयाकरणभूषणासारः : कोण्डभट्टः, व्याख्याकार सम्पादकश्च चौखम्बा कृष्णदा, अक्कादमी वाराणसी

४. व्याकरणमहाभाष्यम् : प. जयशङ्करलालत्रिपाठी कृष्णदास अक्कादमी, वाराणसी

५. परमसधुमञ्जुषा : अचार्य लोकमणि दाहल् चौखभ्बा सुरभारती प्रकाशन वाराणसी २००३

६. शाब्दबोधमीमांसा : N.S. Ramanujatatacharya Published by Rastriya Sanskrit Samstan Deemed University Janakapuri, New Delhi

7. वैयाकरणाप्रन्थ मुक्तावलि : Dr. Ashok Chandra Gaurshastri Nag Publishers Javahar Nagar, New Delhi


•...•